# किरणतन्त्रे ऽष्टपञ्चाशत् पटलः ॥ ५८ ॥

गरुड उवाच ।
योगाभ्यासं समाचक्ष्व तदभ्यासे फलं तु किम् ।
कस्मिन्कार्यं कथं योगं कैरङ्गैरासनैस्तु किम् ॥ १ ॥
भगवानुवाच ।
महत्सिद्धिसमायोगाद्योगः स्यात्परमे पदे ।
योगात्सिद्धिश्च मोक्षश्च तेनाभ्यासः शुभः खग ।

[षडङ्गानि]

षडङ्गः स च बोद्धव्यस्तेनाङ्गानि शृणुष्वतः ॥ २ ॥
प्रत्याहारस्तथा ध्यानं प्राणायामो ऽथ धारणा ।

---

Codices for the *mūla* of the fifty-eighth *paṭala*: $N_1D^1M^YG_2G_3M_2E_D$.

---

**1 .** गरुड उवाच ] $N_1D^1M^Y$ ; गरुडः $G_2G_3E_D$ ; *om.* $M_2$ **1 a.** समाचक्ष्व ] $N_1D^1G_2G_3E_D$ ; स्माचक्ष्म $M^Y$ ; समाचार्यो $M_2$ **1 b.** किम् ] $N_1D^1M^YG_3M_2E_D$ ; कम् $G_2$ **1 c.** कस्मिन् ] $D^1M^YM_2E_D$ ; कस्मिं $N_1$ तस्मिन् $G_3$ ; --- $G_2$ • योगं ] $N_1D^1$ ; योगः $M^Y$ ; --- $G_2$ ; योगो $G_3$ ; योगे $M_2E_D$ **1 d.** °रासनैस्तु किम् ] $N_1$ ; °रासनैस्तु कैः $D^1$ ; °रासनं तु किम् $M^YG_2G_3M_2E_D$ **2 .** भगवानुवाच ] $N_1D^1M^Y$ ; भगवान् $G_2G_3E_D$ ; ईश्वरः $M_2$ **2 ab.** महत्सिद्धिसमायोगाद्योगः स्यात्परमे पदे ] $N_1$ ; महत्सिद्धिसमायोगाद्योगाद्योगः स्यात्परमेष्टदः $D^1$ ; महत्सिद्धिसमायोगाद्योग स्यात्परमे पदे $M^Y$ ; *om.* $G_2G_3M_2E_D$ **2 c.** सिद्धिश्च मोक्षश्च ] $D^1M^YG_3M_2E_D$ ; सिद्धिश्च मोक्षञ्च $N_1$ ; सिद्धिञ्च मोक्षाश्च $G_2$ **2 d.** तेनाभ्यासः शुभः ] $D^{1c}M^Y$ ; तेनाभ्यासशुभो $N_1$ ; तेनाभ्यासः शुभं $D^{1ac}$ ; तेनाभ्य --- $G_2$ ; तेनाभ्यासाच्छुभं $G_3$ ; तेनाख्याच्छुभना $M_2$ ; तदभ्यासाच्छुभं $E_D$ **2 f.** तेनाङ्गानि शृणुष्वतः ] $N_1$ ; तेनाङ्गानि शृणुष्व च $D^1$ ; तस्याङ्गानि श्रुषणुष्व हि $M^Y$ (unmetrical) ; तस्याङ्गानि शृणुष्व तु $G_2G_3M_2$ ; तस्याङ्गानि शृणुष्व तत् $E_D$ **3 b.** धारणा ] $N_1D^1M^Y$ ; धारणम् $G_2G_3M_2E_D$

---

**1** ($c^5$) $M^Y$; ($c^1$–$c^4$, $c^7$–$c^8$) $G_3$

तर्कश्चैव समाधिश्च योगाङ्गानि स्थितानि तु॥ ३॥

[स्थानम्]

गिरिकन्दरदुर्गे वा विजने शिवसंश्रये।
गृहे वापि शुभे स्थाने योगी योगं समारभेत्।

[आसनानि]

बद्धासनं यथाभीष्टं स्वस्तिकं पद्ममेव वा॥ ४॥
अर्धचन्द्रं च वीराख्यं योगपट्टप्रसारितम्।
पर्यङ्कं च यथासंस्थमासनाष्टकमुच्यते॥ ५॥
द्विगुणं पृष्ठतो नीत्वा वामपादं तु दक्षिणम्।
तिर्यक्तं द्विगुणं कृत्वा जङ्घालग्नं तु स्वस्तिकम्॥ ६॥

---

**3 c.** तर्कश्चैव ] $N_1D^1M^Y$ ; आसनञ्च $G_2G_3M_2E_D$ • समाधिश्च ] $N_1D^1M^YG_3M_2E_D$ ; समाधिञ्च $G_2$ **3 d.** योगाङ्गानि स्थितानि तु ] $M^Y$ ; योगाङ्गानि तु षड्विधः $N_1$ ; योगाङ्गं तेन षड्विधम् $D^1$ ; श्चयोगानि स्थितश्च सः $G_2$ ; षडंगोगानि स्थितश्च सः $G_3$(unmetrical) ; योगाङ्गानि स्थितश्च सः $M_2$ ; योगाङ्गानि षडेव तु $E_D$ **4 ab.** गिरिकन्दरदुर्गे वा विजने शिवसंश्रये ] $N_1D^1M^Y$ ; *om.* $G_2G_3M_2E_D$ **4 c.** शुभे ] $N_1D^1M^Y$ ; शिव° $G_2G_3M_2E_D$ **4 d.** पद्ममेव ] $N_1D^1M^YM_2E_D$ ; पत्ममेव $G_2G_3$ **5 a.** अर्ध° ] $M^YG_2G_3M_2E_D$ ; ह्यर्द्ध° $N_1D^1$ **5 b.** योगपट्ट° ] $N_1G_2G_3M_2E_D$ ; योगपट्टं $M^YD^1$ **5 c.** पर्यङ्कं च ] $N_1D^1M^YE_D$ ; पर्यंगञ्च $G_2G_3$ ; पर्युगं च $M_2$ **5 cd.** °संस्थमासनाष्टक° ] $N_1D^1M^YG_3E_D$ ; °संस्थमासनाष्टौ स° $G_2$ ; °संस्थं मानाष° $M_2$(unmetrical) **6 b.** वामपादं तु दक्षिणम् ] $G_2G_3M_2E_D$ ; वामपादे तु दक्षिणं $M^Y$ ; वामपादन्तु दक्षिणः $N_1$ **6 c.** तिर्यक्तं ] $N_1D^1$ ; तिर्यक्त $M^Y$ ; तिस्थम् $G_2$(unmetrical) ; ति ⊔ स्थम् $G_3$ ; तस्थं $M_2$(unmetrical) ; तिर्यक्स्थं $E_D$ **6 d.** °लग्नं तु ] $N_1D^1M^Y$ ; °लग्नं च $G_2G_3M_2E_D$

---

**3.2** Note that the South Indian reading *āsanañ ca* postdates Vaktraśambhu, who cites the verse with *tarkaś caiva* on p. 67 of T. 1021: श्रीमत्किरणे। प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा। तर्कश्चैव समाधिश्च योगाङ्गानि स्थितानि च॥
**6.2** The reading *tiryaktaṃ* receives support from Rāmakaṇṭha's quotation ad *Mataṅga yogapāda* 2:20c–22b, Pune MS f. 49r.

न्यसेद्द्विगुणमन्योन्यं पादमेकं तथोत्तरम् ।
पद्ममेवं समाख्यातमर्धचन्द्रं शृणुष्वतः ॥ ७ ॥

तद्वत्पादद्वयं कृत्वा तलान्योन्यसुसंस्थितम् ।
अर्धचन्द्रं भवेदेवं वीराख्यन्तच्छृणुष्वतः ॥ ८ ॥

द्विगुणं पतितं पादं वामं दक्षं ततो ऽर्ध्वतः ।
कृत्वान्योन्यतलस्थं तु वीरपट्टमथोच्यते ॥ ९ ॥

कृत्वा वै द्विगुणौ पादौ तिर्यगूर्ध्वम् मनाक् खग ।
न्यसेत्पाणौ यथा पट्टं ततः श्लिष्टाङ्गुलीयकौ ॥ १० ॥

---

**7b.** तथोत्तरम् ] $N_1M^YD^1$ ; तथेतरम् $G_2G_3M_2E_D$ **7c.** पद्ममेवं ] $N_1D^1M^YM_2E_D$ ; पत्ममेवं $G_2G_3$ **7d.** °र्धचन्द्रं शृणुष्वतः ] $N_1$ ; °र्धचन्द्रं शृणुष्व तत् $D^1$ ; °र्धचन्द्रं श्रुणुष्व च $M^Y$ ; °ह्यचन्द्रं शृणुष्व तु $G_2$ ; °र्धचन्द्रं शृणुथ $G_3$(unmetrical) ; °ध्यचन्द्रं शृणुष्व तत् $M_2$ ; °र्धचन्द्रमथ शृणु $E_D$ **8a.** °द्वयं ] $N_1D^1M^YG_2G_3E_D$ ; °त्रयं $M_2$ **8b.** तलान्योन्यसुसंस्थितम् ] $N_1D^1$ ; स्वतलान्योन्यसंस्थितं $M^Y$ ; स्वरलोल्योन्यसंस्थितम् $G_2G_3$ ; स्वरलोलोन्यसंस्थितः $M_2$ ; स्वरलोलो ऽन्यसंस्थितम् $E_D$ **8c.** °चन्द्रं भवेदेवं ] $D^1M^Y$ $G_2G_3E_D$ ; °चन्द्रभवेदेवं $N_1$ ; °चन्द्रं भवेद्देवं $M_2$ **8d.** वीराख्यन्तच्छृणुष्वतः ] $N_1$ ; वीराख्यं तच्छृणुष्व हि $D^1$ ; वीराख्यातं श्रुणुष्व तत् $M^Y$ ; वीरासनं शृणुष्वथः $G_2$ ; वीरासनं शृणुष्वथ $G_3M_2$ ; वीरासनमथ शृणु $E_D$(unmetrical) **9ab.** पतितं पादं वामं ] $G_2G_3M_2E_D$ ; पतितम्वामम्पदन् $N_1D^1$ ; पतितं चात्र वीरं $M^Y$ **9b.** दक्षं ततो ऽर्ध्वतः ] $N_1$ ; दक्षं ततोर्धतः $D^1$ ; पट्टमथोच्यते $M^Y$ ; दक्षिणतोर्त्थतः $G_2G_3M_2$ ; दक्षिणतोत्थितम् $E_D$ **9cd.** ] *om.* $M^Y$ **9d.** वीरपट्ट° ] $N_1G_3M_2E_D$ ; वीरपङ्क° $D^1$ ; वीरं पट्ट° $G_2$ **10a.** कृत्वा वै द्विगुणौ ] $N_1D^1M_2$ ; कृत्वादौ द्विगुणौ $M^Y$ ; कृत्वा द्वौ द्विगुणं $G_2G_3$ ; कृत्वादौ द्विगुणं $E_D$ **10b.** °गूर्ध्वम् मनाक् खग ] $D^1$ ; °गूर्ध्वमनाङ्खग $N_1$ ; °गूर्ध्वमधः खग $M^YE_D$ ; °गूर्ध्वमथा खग $G_2G_3$ ; °लध्वमथादिगः $M_2$ **10c.** पाणौ ] $N_1D^1$ ; पाणि $M^YG_2G_3M_2$ ; पाणिं $E_D$ **10cd.** पट्टं ततः ] $M_2E_D$ ; पट्टशृत° $N_1$ ; पङ्कश्रित° $D^1$ ; पट्टं सृत° $M^Y$ ; पट्ट ⏑ त $G_2$ ; पट्टं तत $G_3$ • °लीयकौ ] $N_1M^YG_2G_3M_2E_D$ ; °लीयकः $D^1$

---

**8.2** लक्षणमुक्तं श्रीमत्किरणे— वीराख्यं तच्छृणुष्वैतत् । दक्षिणं चोर्ध्वतः स्थित्वा वामपादतलस्थितम् । द्विगुणं पतितं चात्र वीरम् । इति । Quotation in Trilocana’s *Somaśambhupaddhatiṭīkā* ad SP1, 9:14b.

पादद्वयं प्रसार्याथ संमुखं सुप्रसारितम् ।
पृष्ठतो ह्युपधानस्थं प्रसार्य चरणद्वयम् ॥ ११ ॥
पर्यङ्कं तत्समाख्यातं यथासंस्थं यथास्थितिः ।

[करणम्]

एषामेकतमं बद्ध्वा वितत्योरःस्थलं समम् ॥ १२ ॥
हस्ते हस्ततलं कृत्वा वामस्थस्य तु दक्षिणम् ।
तत्स्वकीयाङ्कगं कार्यं दीर्घं वा वामकं करम् ॥ १३ ॥
वामजानुसमायुक्तं दक्षिणं चाङ्गगं न्यसेत् ।
अञ्जलिं वा परावृत्तं समदृष्टिः समाननः ॥ १४ ॥

[प्रत्याहारः]

---

**11 a.** पादद्वयं प्रसार्याथ सं° ] $D^1$; पादद्वयप्रसार्याथ सं° $N_1$; पादद्वयं प्रसार्य्याथ सं° $M^Y$; पादद्वयं प्र --- $G_2$; पादद्वयं प्रसार्यात्मा सु° $G_3$; पादद्वयं प्रदार्यात्मा सु° $M_2$; पादद्वयं प्रसार्यात्मसु° $E_D$ **11 c.** पृष्ठतो ह्युपधान° ] $N_1D^1$; पृष्ठकोप्युपधान° $M^Y$; ⌣ष्टतो व्यवधा⌣ $G_2$; दृष्टतो व्यवधान° $G_3$; दृष्टतो प्यवध्यान° $M_2$; दृष्टतो ऽप्यवधान° $E_D$ **12 a.** पर्यङ्कं तत् ] $N_1D^1M^YE_D$; पर्यं --- त् $G_2$; पर्यंगतं $G_3$; पर्यंकतत् $M_2$ **12 b.** यथास्थितिः ] $N_1D^1G_3M_2E_D$; यथास्थितं $M^Y$ **12 c.** बद्ध्वा ] $N_1M^YG_2G_3M_2E_D$; यद्वा $D^1$ **13 b.** वामस्थस्य तु ] $N_1D^1$; वामहस्तस्य $M^YG_2G_3M_2E_D$ **13 c.** तत्स्वकीयाङ्कगं कार्यं ] *conj.*; तत्स्वकीयाङ्गगङ् कार्यो $N_1$; तत्स्वकीयाङ्गगं कार्यं $D^1$; स्वीयकायगतं कृत्वा $M^Y$; तत्स्वकियकरः कार्य्यन् $G_2$; तत्स्वकीयकरः कार्य्य × दी× न् $G_3$; तत्स्वकीयकरः कार्यं $M_2$; तत्स्वकीयकरः कार्यो $E_D$ **13 d.** दीर्घं वा वामकं करम् ] $N_1D^1G_2$; सुदीर्घं वामकं करं $M^Y$; दीर्घं वामकरं क ⌣म् $G_3$; दीर्घं वामकरं करम् $M_2E_D$ **14 b.** दक्षिणञ्चाङ्गगं ] $N_1D^1$; दक्षिणं चांकके $M^Y$; दक्षिणं वामके $G_2G_3M_2E_D$ **14 c.** अञ्जलिं ] $N_1D^1M^YG_2M_2E_D$; अञ्जलीं $G_3$ • °वृत्तं ] $N_1D^1$; °वृत्तः $M^Y$; °वृत्तिः $G_2G_3M_2E_D$ **14 d.** °दृष्टिः समाननः ] $D^1M^Y$; °दृष्टिसमाननः $N_1$; °दृष्टिमथानयेत् $G_2G_3M_2E_D$

---

**11** ($a^6$–$b^4$) $G_2$
**12** ($a^3$–$a^4$) $G_2$, ($b^3$–$b^5$) $G_3$

अक्षेशमानयेत्पूर्वमिन्द्रियार्थं गतं शनैः।
तदानीय हृदि स्थाप्य पुनर्ध्यानं समाहरेत्।
तावद्यावत्स्थिरो जातः प्रत्याहारः स उच्यते॥ १५ ॥

[ध्यानम्]

ततो ध्यानं हृदिस्थाने यथासङ्कल्परूपकम्।
कृत्वा ध्यानं पुनः कार्यं प्राणायामत्रयं शनैः॥

[प्राणायामाः]

पूरकः कुम्भकश्चैव रेचकश्च तृतीयकः।
पूरकः पूरणाद्वायोः कुम्भकः सन्निरोधतः॥ १६ ॥
रेचनाद्रेचकः प्रोक्तः प्रणवेनाभ्यसेत्त्रयम्।

---

**15 ab.** अक्षेशमानयेत्पूर्वमिन्द्रियार्थं गतं शनैः ] $N_1$; अक्षं समानयेत्पूर्वमिन्द्रियार्थः गतः शनैः $D^1$; अक्षेशमानयेत् पूर्वमिंद्रियार्थगतं (गतैः $M^{Y ac}$) शनैः $M^Y$; *om.* $G_2G_3M_2E_D$ **15 c.** तदानीय ] $G_3E_D$; तदानीत्य $N_1$; तमानीय $D^1$; तदाहृत्य $M^Y$; ददानीय $G_2$; ददानीह $M_2$ **15 d.** पुनर्ध्यानं ] $N_1D^1$; पुनर्यातं $M^YG_2G_3M_2E_D$ **15 e.** यावत्स्थिरो जातः ] $N_1D^1$; यावत्स्थिरं जातं $M^Y$; याव स्थतज्ञातम् $G_2$; यावत्स्थितं जातं $G_3E_D$; यावत्स्थितं जतं $M_2$(unmetrical) **15 f.** प्रत्याहारः स ] $N_1D^1M^YG_2G_3E_D$; प्रत्येहा-नस्स $M_2$ **16 ab.** ततो ध्यानं हृदिस्थाने यथासङ्कल्परूपकम्। $N_1D^1$; ततो ध्यानं हृदि स्थाने यथा संकल्प्यरूपकं $M^Y$; *om.* $G_2G_3M_2E_D$ **16 cd.** कृत्वा ध्यानं पुनः कार्यं प्राणायामत्रयं शनैः ] $N_1D^1M^Y$; *om.* $G_2G_3M_2E_D$ **16 e.** पूरकः ] $D^1M^YG_2G_3E_D$; पूरको $N_1$; पूरकं $M_2$ **16 g.** पूरकः पूरणाद्वायोः ] $N_1D^1M^Y$; पूरणात् पूरको वायुं $G_2$; पूरणात्पूरको व्यापी $G_3$; पूरणात्पूरको वापि $M_2E_D$ **16 h.** कुम्भकः सन्निरोधतः ] $N_1D^1M^Y$; यो कुम्भस्थन्निरोधकः $G_2G_3$; यो कुंभस्थं निरोधकः $M_2$; यः कुम्भस्तन्नि-रोधकः $E_D$ **17 b.** प्रणवेनाभ्यसेत्त्रयम् ] $D^1M^Y$; प्रणवेनाभ्यसेत्त्रयः $N_1$; प्राणायामत्रयं कुरु $G_2G_3E_D$; प्राणायाम ⊔ $M_2$

---

**15** ($e^4$) $G_3$
**17** [$b^5$–$e^2$] $M_2$

गोदोहमातृकं यावदभ्यासादुत्तमो मतः ।
अभ्यासे सति चाकृष्टिर्निरोधो मोक्षणं भवेत्॥ १७ ॥
द्रव्यस्य कलहस्यैवं सिद्धयोगी सदा भवेत् ।

[धारणाः]

संसिद्धं योगिनां मुख्यं धारणानां चतुष्टयम्॥ १८ ॥
वह्निसौम्यामृता चान्या पराख्या धारणास्त्वमूः ।

[आग्नेयी धारणा]

मूलं रेफपुटान्तस्थं पञ्चमस्वरबिन्दुकम्॥ १९ ॥

---

**17 cd.** गोदोहमातृकं यावदभ्यासादुत्तमो मतः ] $N_1$; गोदोहमात्रिकं यावदभ्यासादुत्तमो मतः $D^1$; गोदोहमात्रं यावदभ्यासादुत्तमोतमः $M^Y$(unmetrical); *om.* $G_2G_3M_2E_D$ **17 e.** अभ्यासे सति चाकृष्टिर् ] $N_1D^1M^Y$; अभ्यसे सति चाकृष्टे $G_2$; अभ्यसेस्ततचाकृष्टे $G_3$; ⊔ से सति चाकृष्टे $M_2$; अभ्यासे सति चाकृष्टे $E_D$ **17 f.** निरोधो मोक्षणं ] $N_1D^1M^Y$ $M_2$; निरोधे मोक्षणम् $G_2$; निराधो मोक्षणं $G_3$; निरोधन्मोक्षणं $E_D$ **18 a.** कलहस्यैवं ] $E_D$; कलशस्येव $N_1D^1$; सकलस्यैवं $M^Y$; कलहस्येवं $G_2G_3M_2$ **18 b.** सिद्धयोगी सदा ] $N_1D^1G_3$; सिद्धो योगी यदा $M^Y$; सिद्धयोगी यथा $G_2M_2E_D$ **18 c.** संसिद्धं योगिनां मुख्यं ] $N_1D^1$; संसिद्धं योगिनो मुख्यं (क्तं $M^{Yac}$) $M^Y$; संसिद्धियोगिनो मुख्यं $G_2G_3$; संसिद्धियोनो मुख्यं स्याद् $M_2$; संसिद्धयोगिनो मुख्यं $E_D$ **18 d.** धारणानां ] $N_1D^1M^Y$ $G_3M_2E_D$; धारणाञ् $G_2$(unmetrical) **19 a.** वह्निसौम्यामृता चान्या ] $N_1D^1$; वाह्नी सौम्यामृता चान्या $M^Y$; वह्निसौम्यहृतावाह्य $G_2$; वह्निसौम्यमृतावाह्य $G_3$; वह्निसौम्या-मृतावाह्य $M_2$; वह्निसौम्यामृताबाह्या $E_D$ **19 b.** धारणास्त्वमूः ] $M^Y$; धारणास्त्वमू $N_1$; धारणास्वमू $D^1$; द्धरणास्ततः $G_2$; धारणास्तुतम् $G_3$; र्थरणस्तुतः $M_2$; धारणास्तु ताः $E_D$ **19c.** मूलं रेफ॰ ] $G_2M_2E_D$; मूलरेफ॰ $N_1D^1G_3$; कृशोरेव $M^Y$ • ॰स्थं ] $N_1D^1G_2G_3M_2E_D$; ॰स्थः $M^Y$ **19 d.** पञ्चमस्वरबिन्दुकम् ] $N_1D^1$; पंचमस्वरबिंदुगः $M^Y$; पञ्चमस्थश्च बिन्दुगम् $G_2$; पञ्चमस्थं च बिन्दुगम् $G_3M_2E_D$

---

**19** ($c^8$) $G_3$

---

**17.2** Cf. *Parākhya* 14:27c–28b: गोदोहमात्रकं यावद्यदा तस्य विधारणा। भवेदेवं जि-तस्तेन स वायुः कोष्ठगो ऽखिलः।

चलार्णसंयुता दीप्ता धारणा पादगा मता।
सर्पोद्धारे रिपूत्सादे पापप्रालेयसङ्क्षये॥ २०॥
त्रिकोणमण्डलस्थो ऽयं कूटो वह्निः स्वयं भवेत्।
वायुवेष्टितसर्वाङ्गो बीजदाहादिकृत्परः॥ २१॥

[सौम्या धारणा]

पूर्वोक्तो वारिसंयुक्तः सौम्ये विन्दुयुतः स्वयम्।
तोयमण्डलमध्यस्थः परितस्तेन वेष्टितः।
धार्येयं हृद्गुहावासे सोमसंश्रयशालिनी॥ २२॥
शान्तिपुष्टिकरी चेयमुपसर्गविसर्जनी।

[अमृता धारणा]

---

**20a.** चलार्णसंयुता दीप्ता ] $G_2G_3M_2E_D$ ; चलार्णसंयुतां दीप्तां $N_1$ ; चलार्णसंयुतं दीप्तं $D^1$ ; बंधार्णसंयुता दीप्ता $M^Y$ **20b.** पादगा ] $N_1D^1M^Y$ ; पापका $G_2G_3M_2$ ; पावका $E_D$ **20c.** सर्पोद्धारे ] $N_1$ ; सर्वोद्धारे $D^1M^YG_2G_3E_D$ ; सर्वोद्धाये $M_2$ **20cd.** रिपूत्सादे पापप्रालेयसङ्क्षये ] *conj.* ; रिपूत्सादे पापप्रालेपसङ्क्षये $N_1M^Y$ ; रिपूत्सादे पापे प्राणोपसंक्षये $D^1$ ; रिपूत्सादिवावप्रालेपसंक्षयेत् $G_2$ ; रीपुत्सादिवावप्रालेपसंक्षयेत् $G_3$ ; रीपुत्सादिपापप्रालेपसंक्षयेत् $M_2$ ; ऽरिहिंसादिपापः प्रागेव संक्षयेत् $E_D$ **21a.** त्रिकोणमण्डलस्थो ] $N_1D^1M^YG_2M_2E_D$ ; ⏑कोणम्मण्डलस्थो $G_3$ **21b.** कूटो वह्निः स्व्यं ] $D^1M_2E_D$ ; कूटो वह्नि स्वयं $N_1M^Y$ ; कूटो वह्निद्वयम् $G_2$ ; कूटे ⏑ह्निस्वयम् $G_3$ **21d.** बीजदाहादि° ] $N_1D^1M^YM_2E_D$ ; बीजदाहा° $G_2$(unmetrical) ; बीजादाहादि° $G_3$ **22a.** पूर्वोक्तो वारिसंयुक्तो ] $N_1D^{1ac}$ ; पूर्वोक्तो वारिसंयुक्तः $D^{1c}M^{Yc}$ ; पूर्वोक्तो वारिसं× यु× युक्तः $M^Y$ ; पूर्वोक्ता वारिसंयुक्ताः $G_2$ ; पूर्वोक्तवारिसंयुक्तः $G_3E_D$ ; पूर्वोक्तावारिसंयुक्तः $M_2$ **22b.** सौम्ये विन्दुयुतः ] $D^{1ac}$ ; सौम्ये विन्दुयुत $N_1$ ; सौम्यो विन्दुयुतः $D^{1c}$ ; सौम्या बिंदुगत $M^Y$ ; सौम्यबिन्दुयुत $G_2$ ; स---म्ये बिन्दुयुत $G_3$ ; सौम्ये बीजयुते $M_2$ ; सौम्यबिन्दुयुतः $E_D$ **22c.** °स्थः ] $D^1M^YG_2G_3M_2E_D$ ; °स्थो $N_1$ **22d.** परितस्तेन ] $N_1D^1M^YG_2G_3E_D$ ; पूरितस्तेन $M_2$ **22ef.** धार्येयं हृद्गुहावासे सोमसंश्रयशालिनी ] $N_1D^1M^Y$ ; *om.* $G_2G_3M_2E_D$ **23ab.** °करी चेयमुपसर्गविसर्जनी ] $G_2G_3M_2E_D$ ; °करंश्चायमुपसर्गविनाशकः $N_1$ ; °करश्चायमुपसर्गविनाशकः $D^1$ ; °करं वायमुपसर्गविनाशकः $M^Y$

---

**20** ($c^1$) $G_2$
**22** ($a^6$) $G_3$

स एवामृतसंयुक्तः प्रणवेनोर्ध्वयोजितः॥ २३॥
बिन्दुना संयुतो मूर्ध्नि त्रिस्वरेण विवेष्टितः।
अमृतेयं सदा मूर्ध्नि व्यापिनी जीवरक्षणी॥ २४॥

[ईशानी धारणा]

सैव कालसमायुक्ता षष्ठस्वरसमन्विता।
उकारबिन्दुसंयुक्तो नादशक्तिसमन्वितः।
बिन्दुरक्षितसर्वाङ्गो ललाटस्थानसंश्रितः॥ २५॥
सदा तस्मिन् स्थितो योगी भवेन्मृत्युबहिष्कृतः।

[उद्घाताः]

वेदवह्निक्रमात् पक्षशशांकोद्घातयोगतः।
अभ्यासो धारणानां स्यात्क्रमशः स्थितिलक्षणाः॥ २६॥

---

**23 c.** °युक्तः ] $D^1M^YE_D$ ; °युक्तो $N_1$ ; °युक्ता $G_2M_2$ ; ⌣क्ता $G_3$ **24 a.** बिन्दुना संयुतो मूर्ध्नि ] $N_1D^1M^Y$ ; बिन्दुगो बीजदाहादि° $G_2G_3E_D$ ; बिन्दुको बीजदाहादि° $M_2$ **24 b.** त्रिस्वरेण विवेष्टितः ] $N_1D^1$ ; त्रिसुरेण विवेष्टितः $M^Y$ ; त्रिस्वरेण निवेष्टितः $G_2M_2E_D$ ; त्रिस्वरेण निवेष्टिता $G_3$ **24 c.** अमृतेयं सदा मूर्ध्नि ] $N_1D^1M^YE_D$ ; अमृतेय सदा मूर्द्धर्नि $G_2$ ; अमृतेय सदा मूर्द्धि $G_3$ ; अत्रतेय सदा मूर्ध्नि $M_2$ **24 d.** °रक्षणी ] $N_1M^Y$ ; °रक्षिणी $D^1$ ; °कांक्षया $G_2G_3M_2E_D$ **25 ab.** सैव कालसमायुक्ता षष्ठस्वरसमन्विता ] $N_1D^1$ ; स एव कालसंयुक्तः षष्ठस्वरसमन्वितः $M^Y$ ; *om.* $G_2G_3M_2E_D$ **25 c.** उकार° ] $N_1D^1$ ; अकार° $M^YG_2G_3M_2E_D$ • °युक्तो ] $N_1M^YG_2G_3M_2E_D$ ; °युक्ता $D^1$ **25 d.** नाद° ] $N_1D^1G_2G_3M_2E_D$ ; नादः $M^Y$ • °समन्वितः ] $N_1M^YG_2G_3M_2E_D$ ; °समन्विता $D^1$ **25 c.** °सर्वाङ्गो ] $N_1M^YG_2G_3M_2E_D$ ; °सर्वाङ्गा $D^1$ **25 d.** ललाटस्थानसंश्रितः ] $N_1G_2E_D$ ; ललाटस्थानसंश्रिता $D^1$ ; ललाटस्थानसंस्थितः $M^Y$ ; ललाटस्थानसंशृतः $G_3$ ; लाटस्थानसमाश्रितः $M_2$ **26 a.** सदा तस्मिन् ] $N_1D^1M^Y$ ; तदा तव $G_2M_2$ ; तदातप $G_3$ ; तदातपः $E_D$ **26 cd.** वेदवह्निक्रमात् पक्षशशांकोद्घातयोगतः ] $M^Y$ ; वेदवह्निक्रमापक्षः शशाङ्कोद्घातयोततः $N_1$ ; वेदवह्निक्रमापेक्षशशांकोर्धान्तयोगतः $D^1$ ; *om.* $G_2G_3M_2E_D$

---

**25** ($c^2$–$c^3$, $c^5$) $G_3$

उद्घातो द्विविधः प्रोक्तः सामान्यो ऽथ विशेषकः।
हस्तेन जानुसंयोगभ्रमान्मात्रा भवत्यथ॥ २७॥
ताभिर्द्वादशभिर्मात्रा ह्युद्घातस्तत् स्फुटो भवेत्।
सामान्यो ऽप्युपयुज्येत सदासौ धारणा जयेत्॥ २८॥
वैशेषिकः स्वकार्येषु स्वस्थप्राणगतेः स्थितिः।
गत्वा हिनस्ति मूर्धान्तमुद्घातो ऽसौ विशेषतः॥ २९॥

---

**26 e.** अभ्यासो धारणानां स्यात् ] $N_1D^1$; चतस्रो धारणानां स्यात् $M^Y$; चतुस्रो धारणा धार्य्याः $G_2$; चतस्रो धारणा ध --- $G_3$; चतस्रो धारणा धार्यः $M_2$; चतस्रो धारणा धार्याः $E_D$ **26 f.** °लक्षणाः ] $N_1E_D$; °लक्षणा $D^1$; °लक्षणं $M^YG_2G_3M_2$ **27 a.** उद्घातो द्विविधः ] $M^Y$; उद्घातो विविधः $N_1$; उद्घाटो द्विविधः $D^1$; उत्पातो विविधः $G_2M_2$ $E_D$; उत्पातो विविध $G_3$ **27 b.** सामान्यो ऽथ विशेषकः ] *conj.*; सामान्यो ऽन्यो विशेषतः $N_1D^1$; सामान्यो थ विशेषतः $M^Y$; *om.* $G_2$(eyeskip); सामान्योपि विशेषतः $G_3M_2E_D$ **27 cd.** हस्तेन जानुसंयोगभ्रमान्मात्रा भवत्यथ ] $M^Y$; सामान्यो जानुसंयोगः भ्रमन्ताला भवत्यथ $N_1$; सामान्यो जानुसंयोगो भ्रमत्तालो (भ्रमन्नालो $D^{1ac}$) भवत्यथ $D^1$; सामान्यो जानुसंयोगादूहां कर्म्म उच्यते $G_2$(unmetrical); सामान्यो अनुसंयोगादूहं कर्म्म उच्यते $G_3$(unmetrical); सामान्यो ज (जा $M_2$) तुसंयोगादृहनं कर्म उच्यते $M_2E_D$ **28 ab.** ताभिर्द्वादशभिस्ताळ उद्घातस्तच्छताद्भवेत् ] $M^Y$; ताभिर्द्वादशभिर्मात्रा ह्युद्घातस्तत् स्फुटो भवेत् $N_1$; ताभिर्द्वादशभिर्मात्रो ह्युद्घाटस्तत्स्फुटो भवेत् $D^1$; समाधिभावनान्तस्थामजरास्वच्चिताम् भव $G_2$; समाधिभावनान्तस्थामजरास्वच्चिताम् भवति $G_3$(unmetrical); समाधिभवनान्तस्थमजरास्वर्चितां भवति $M_2$(unmetrical); समाधिभावनान्तस्था न जरास्वन्विता भवन् $E_D$ **28 c.** °युज्येत ] $N_1M^YG_2G_3M_2E_D$; °युंजीत $D^1$ **28 d.** सदासौ धारणा जयेत् ] *conj.*; सदा साधारणां जपेत् $N_1$; सदा सा धारणां जयेत् $D^{1ac}$; सदा सा धारणां ज्जयेत् $D^{1c}$; सदासौ धारणा जपे $M^Y$; सदासौ धारणा यजेत् $G_2G_3M_2E_D$ **29 a.** वैशेषिकः स्वकार्येषु ] $N_1D^1$; वैशेषिकस्वकाये तु $M^Y$; वैशेषकस्वकाये तु $G_2G_3M_2$; वैशेषिकस्वकार्ये तु $E_D$ **29 b.** स्वस्थप्राणगतेः स्थितिः ] *conj.*; स्वस्थः प्राणगते स्थितिः $N_1$; स्वस्थः प्राणगतस्थितिः $D^1M^Y$; स्वस्थप्राणगति स्थितः $G_2G_3M_2$; स्वस्थप्राणगतिः स्थितः $E_D$ **29 c.** गत्वा हिनस्ति मूर्धान्तम् ] $N_1D^{1ac}$; गत्वा हिनस्ति मूर्धानम् $D^{1c}$; गत्वोर्ध्वे हंति मूर्धानम् $M^Y$; गत्वा च हन्ति मूर्धानम् $G_2G_3M_2E_D$ **29 d.** °तो ऽसौ ] $N_1M^YE_D$; °टो सौ $D^1$; °ते सौ $G_2$; °तौ सौ $G_3M_2$

---

**26** ($c^8$–$d^1$) $G_3$
**28 ab.** Note that some form of the Southern version of this half-line recurs as 30cd below.

[तर्कः]

अध्यात्मध्यानसंयोगादूहनं तर्क उच्यते।

[समाधिः]

समाधिर्भावनान्तस्था स्थिरावस्तुगता यदा॥ ३०॥

समाधौ परिनिष्पन्ने योगी योगफलं लभेत्।
क्रमाद्ब्रह्मादिको योगः फलं तद्वत्तथोत्तरम्॥ ३१॥

[हृत्पद्मे]

हृत्पद्मं प्राकृतं ज्ञेयं तत्र ब्रह्माधिदेवता।
साधनीयो विशुद्धो ऽत्र प्रथमाक्षरमध्यगः॥ ३२॥

तत्र नाड्यो दश ज्ञेया विज्ञेया प्रथमा भवेत्।

---

**30 ab.** अध्यात्मध्यानसंयोगादूहनं तर्क उच्यते ] *conj.*; अध्यात्मध्यानसंयोगादूहनात्तर्क उच्यते $N_1$; अन्योन्यधानसंयोगादूहनात्तर्क उच्यते $D^1$; अध्यात्मज्ञानसंयोगादूहनं त-त उच्यते $M^Y$; आद्धा मद्धा न संयोगादुहनन्तत् क उच्य ⌣ $G_2$; आद्धा मद्धा न सैयोज्ञहनन्तकः क उच्यते $G_3$; आध्या मध्या न सैद्योह नकः क उच्यते $M_2$(unmetrical); आद्या मध्या न संयोगादूहनोन्तिम उच्यते $E_D$ (placed after 30cd in $E_D^{vl}$)
**30 c.** °र्भावनान्तस्था ] *conj.*; भावनान्तस्था $N_1D^1M^YG_2G_3E_D$; °भवनान्तस्थां $M_2$
**30 d.** स्थिरावस्तुगता $N_1D^1M^YG_2$; जरावस्तु --- $G_3$; जरावस्तुगतां $M_2$; जरावस्थां गता $E_D$ **31 c.** समाधौ परिनिष्पन्ने ] $N_1D^1$; समाधिपरिनिष्पत्तौ $M^Y$; समासौ पति-निष्पन्ने $G_2G_3M_2$; समाधौ पतिनिष्पन्नौ $E_D$ **31 d.** योगी योगफलं लभेत् ] $D^1M^Y$; योगीश्वरफलं भवेत् $G_3M_2E_D$; योगी योगफलं भवेत् $N_1$; योगीश्वागफलम् भवेत् $G_2$
**31 c.** ब्रह्मादिको योगः ] $N_1D^1M^YG_2$; ब्रह्मादिको योगे $G_3$; प्रादिको योगे $M_2$(unmetrical); ब्रह्मादितो योगे $E_D$ **31 d.** ; तद्वत्तथोत्तरम् ] $N_1D^1M^Y$; तद्वत्तथोत्तमम् $G_2$; तद्यक्तमम् $G_3$(unmetrical); तद्वक्तुमुत्तमम् $M_2$; तद्यक्तमुत्तमम् $E_D$ **32 b.** तत्र ब्रह्मा-धिदेवता ] $M^Y$; तत्र ब्रह्मादिदैवताम् $N_1$; तत्र ब्रह्मादिदैवतम् $D^1$; तत्तत् ब्रह्माधिदेवता $G_2M_2$; तत्तत् ⌣ ह्माधिदेवता $G_3$; तत्तद्ब्रह्माधिदैवतम् $E_D$

सौम्या चैवाङ्शुसंज्ञा धृतिर्या दमनात्मिका॥ ३३॥
बन्धनी मोचनी माया मोहनी बोधनी क्रमात्।
एता दश समाख्याता ब्रह्मपद्मप्रतिष्ठिताः॥ ३४॥
तत्र ब्रह्मा स्वरूपेण भावनीयो ऽथ वर्णगः।
धाराद्यव्यक्तमार्गान्ते भवेत् स्वामिरसौ तदा॥ ३५॥

[कण्ठे]

उपरिष्टाद्यदा गच्छेद्धरिस्थानं भवेत्खग।
नाडयः षोडशा हृत्स्था विज्ञेयाः कण्ठसंस्थिताः॥ ३६॥
तत्र विष्णुः स्थितः शुद्धो द्वितीयाक्षरमध्यगः।

---

**33 c.** सौम्या चैवाङ्शुसंज्ञा च ] $N_1D^1M^Y$; सौम्य चैव पशून्नृक्षेण $G_2^{ac}$(unmetrical); सौम्य चैव पशून्नृणे $G_2^c$; सौम्य चैव पशून्नृक्षौ $G_3$; सौम्य चैव पशूनृक्षौ $M_2$; सौम्या चैव पशूनक्षैः $E_D$ **33 d.** धृतिर्या दमनात्मिका ] $N_1D^1$; धृतिश्च मदनात्मिका $M^Y$; च श्रुतिश्चेदनात्मिका $G_2M_2$; च श्रुतिश्चेतनात्मिका $G_3$; श्रुतिः सा चेतनात्मिका $E_D$ **34 a.** बन्धनी ] $N_1M^YG_2G_3M_2E_D$; वर्धनी $D^1$ **34 ab.** माया मोहनी बोधनी क्रमात् ] $N_1D^1M^Y$; तायम् मोहिनी बोधनी क्रमात् $G_2$; तायम् मोहिनी क्रमात् $G_3$(unmetrical); तोयं ⊔ मोहिनी क्रमात् $M_2$; चेयं मोहिनीयं क्रमात्स्मृताः $E_D$ **34 c.** एता ] $N_1D^1M^Y$; एका° $G_2G_3M_2E_D$ **34 d.** ब्रह्मपद्मप्रतिष्ठिताः ] $N_1D^1$; ब्रह्मपद्मे प्रतिष्ठिताः $M^Y$; ब्रह्मा पद्मे प्रतिष्ठितः $G_2G_3M_2E_D$ **35 ab.** ब्रह्मा स्वरूपेण भावनीयो ] $N_1M^YE_D$; ब्रह्मस्वरूपेण भावनीयो $D^1$; ब्रह्मा स्वरूपेणाभावनी +य+ $G_2$; ब्रह्मा स्वरूपेण भावनी $G_3$(unmetrical); ब्रह्मस्वरूपेण भावनीय $M_2$ **35 c.** धाराद्यव्यक्तमार्गान्ते ] $N_1M^YM_2$; धाराद्या व्यक्तमार्गान्ते $D^1$; धरादव्यक्तमार्गान्ते $G_2$; धराद्यव्यक्तमार्गान्ते $G_3E_D$ **35 d.** भवेत् स्वामिरसौ तदा ] $M^Y$; भवेत्स्वामिरसोत्तमा $N_1$; भवेत्स्वानिरसोत्तमा $D^1$; भवेत् सौमीयसौ तदा $G_2G_3$; भवेत्सौमियसौ तदा $M_2$; भवेत्सौम्या सुशोभगा $E_D$ **36 a.** °द्यदा ] $N_1D^1M^Y$; °द्यथा $G_2G_3M_2E_D$ **36 ab.** गच्छेद्धरिस्थानं ] $N_1D^1M_2E_D$; गच्छेद्वारिस्थानं $M^Y$; गच्छेद्धरिस्नानम् $G_2$; गच्छेद्धरिस्तानम् $G_3$ **36 c.** °शा हृत्स्था ] *conj.*; °शाहृस्था $N_1$; °शो हृत्स्था $D^1$; °शांतस्था $M^Y$; °शाब्जस्था $G_2G_3^cE_D$; श +ा+ ब्जस्था $G_3$; °शब्जस्था $M_2$ **36 d.** विज्ञेयाः कण्ठ° ] $D^1$; विज्ञेया कण्ठ° $N_1M^YG_2$; विज्ञेया कर्ण° $G_3M_2$; विज्ञेयाः कर्ण° $E_D$ **37 a.** विष्णुः स्थितः ] $N_1D^1$; विष्णुस्ततः $G_2G_3M_2E_D$ **37 b.** द्वितीयाक्षरमध्यगः ] $N_1M^Y$; द्वितीयोक्षरमद्धगः $D^1G_2$; द्वितीयो ऽक्षरमास्थितः $G_3M_2E_D$

गुहा मनोरमा दीप्ता सुदीप्ता हिमकारिका॥ ३७॥
सुधूम्रा पिङ्गला पीता वारुणी शीघ्रगादला।
शशाङ्का सुप्रभा चैव ज्ञानदा मोक्षदा परा॥ ३८॥
एवं च षोडशा ह्येते हरिमावृत्य संस्थिताः।
स्वरूपेणाभ्यसेद्विष्णुमथवा वर्णरूपकम्॥ ३९॥
तदभ्यासादयत्नेन सिद्धिः स्यात्पुरुषान्तिका।

[तालुके]

उपरिष्टाद्यदा गच्छेद्रुद्रस्थानं सुनिर्मलम्॥ ४०॥
तालुसंस्थं तु पद्मस्थं चतुर्विंशतिनाडिभिः।

---

**37 c.** गुहा मनोरमा दीप्ता ] $N_1D^1M^Y$ ; शुभा मनोरमा दीप्त्वा $G_2$ ; शुभा मनोरमा दीप्ता $G_3M_2E_D$ **37 d.** सुदीप्ता हिमकारिका ] $D^1$ ; स्वदीप्ता हिमकारिका $N_1$ ; सुदीप्ता घोर-कारिका $M^Y$ ; सुदीप्त्वा भीभकारिका $G_2$ ; सुदीप्ता भीमकारका $M_2$ ; सुदीप्ता भीमकारिका $G_3E_D$ **38 a.** सुधूम्रा पिङ्गला ] $N_1D^1$ ; धूम्रा च पिंगला $M^Y$ ; सु ⏑ मा प्पीगळा $G_2$ ; सुधूमार्प्पिगळा $G_3$ ; सुधूमापि गल° $M_2$ ; सुधूमा पिंगला $E_D$ **38 b.** वारुणी ] $M^YG_2G_3M_2E_D$ ; धारिणी $N_1D^1$ • °गादला ] $N_1D^1$ ; °गाचला $M^YG_2G_3M_2E_D$ **39 a.** एवं च षोडशा ह्येते ] $N_1D^1$ ; *om.* $M^Y$ ; इत्येते षोडश ज्ञेया $G_2G_3$ ; इत्येवं षोडश ज्ञेया $E_D$ **39 b.** हरिमावृत्य संस्थिताः ] $N_1E_D$ ; हरिमावृत्य संस्थिता $D^1$ ; *om.* $M^Y$ ; हिरमावृतसंस्थितः $G_2$ ; हिरमावृत्यसंस्थितः $G_3$ **39 c.** स्वरूपेणाभ्य° ] $N_1D^1M^YE_D$ ; स्वरूपेनाप्य° $G_2$ ; स्वरूपेनाभ्य° $G_3$ **39d.** °रूपकम् ] $M^YG_2G_3E_D$ ; °मायकम् $N_1D^1$ **40 a.** तदभ्या° ] $N_1D^1G_2G_3E_D$ ; सदाभ्या° $M^Y$ **40 b.** सिद्धिः स्यात्पुरुषान्तिका ] $N_1D^1E_D$ ; सिद्धि स्यात्पुरुषात्मिका $M^YG_2$ ; सिद्धि स्यात्पुरुषन्तिका $G_3$ **40 cd.** °द्यदा गच्छेद्रुद्रस्थानं ] $N_1D^1M^Y$ ; °द्यथास्थानं यथास्थानं $G_2G_3M_2$ ; °द्यथा स्थानं तदा स्था-नं $E_D$ **41 a.** तालुसंस्थं तु पद्मस्थं ] $N_1D^1G_2G_3E_D$ ; नानुसंस्थं तु पद्मं स्याच् $M^Y$ ; तालुसंस्थं तु तत्पद्मं $M_2$ **41 b.** °शतिनाडिभिः ] $M^YG_2G_3M_2E_D$ ; °शत्स्वनाडिभिः $N_1D^1$

---

**39 ab.** ] *om.* $M^YM_2$
**39 cd.** ] *om.* $M_2$
**40 ab.** ] *om.* $M_2$

श्रवणा श्रावणी जल्पा तत्कृष्णा घ्राणवर्तिनी॥ ४१॥
सशब्दा वाहिनी बोद्ध्री मननी धावनी शुभा।
आह्लादनी प्रसन्नाख्या वियोक्त्री रेतवाहनी॥ ४२॥
पितृमार्गानुगा नाडी देवमार्गप्रदर्शनी।
आकर्षणी विकर्षी च प्राणदा प्राणवर्धिनी॥ ४३॥
चित्तसंस्था सुसंस्था च धूम्रा चैव तथा ध्रुवा।
ज्ञेयो रुद्रः स्वरूपेण तृतीयार्णगतो ऽथवा॥ ४४॥

---

**41 c.** श्रवणा श्रावणी ] $N_1$; स्रवणा स्राविणी $D^1$; श्रावणा श्रवणी $M^Y$; सुवर्णा श्रवणी $G_2G_3E_D$; सुवर्ण श्रवणी $M_2$ **41 cd.** जल्पा तत्तृष्णा ] *conj.* (cf. *Jñānasiddhānta*); जल्पा तत्कृष्णा $N_1D^1$; जल्पा तत्कृता $M^Y$; जल्पादुत्कृष्टा $G_2G_3$; जल्पा उत्कृष्टा $M_2$; जल्पा चोत्कृष्टा $E_D$ • घ्राणवर्तिनी ] $N_1$; प्राणवर्तिनी $D^1G_2G_3E_D$; घ्राण वर्तितीनी $M^Y$(unmetrical); प्राणवर्धनी $M_2$ **42 a.** वाहिनी बोद्ध्री ] $N_1M^YM_2E_D$; वाहिनी धात्री $D^1$; वाहिनी बेद्ध्री $G_2$; वाहिनीम् बोद्ध्री $G_3$ **42 b.** धावनी ] $M^Y$; धामनी $N_1D^1$; भावनी $G_2G_3E_D$; भवनी $M_2$ **42 c.** आह्लादनी प्रसन्नाख्या ] $N_1D^1$; मोहनी च प्रधानाख्या $M^Y$; ब्रह्मादिनप्रधानाख्या $G_2G_3M_2$; ब्राह्मी दिनप्रधानाख्या $E_D$ **42 d.** वियोक्त्री रेतवाहनी ] $N_1M^Y$; वियोक्तृ रेतवाहनी $D^1$; नियोक्षी रेतवाहिनी $G_2G_3M_2E_D$ **43 b.** °प्रदर्शनी ] $M^Y$; °प्रमर्द्दनी $N_1D^1$; °प्रदर्शिता $G_2G_3M_2E_D$ **43 c.** आकर्षणी विकर्षी च ] $N_1D^1$; आकर्षणी विकर्षणी $M^Y$(unmetrical); आकर्षणी विकर्षणी च $G_2G_3$(unmetrical); आकर्षणी विकर्णी च $M_2$; आकर्षिणी विकर्षिणी $E_D$(unmetrical) **43 d.** प्राणदा प्राणवर्धनी ] $N_1D^1M^Y$; प्राणहा प्राणवद्धिनि $G_2$; प्राणहा प्राणवर्द्धनी $G_3M_2$; प्राणहा प्राणवर्धिनी $E_D$ **44 a.** चित्तसंस्था ] $N_1M^YD^1E_D$; चित्रसंस्था $G_2G_3M_2$ **44 b.** धूम्रा ] $N_1D^1M^Y$; धूमा $G_2G_3M_2E_D$ **44 c.** ज्ञेयो रुद्रः स्वरूपेण ] $E_D$; ज्ञेया रुद्रस्वरूपेण $N_1D^1M_2$; ज्ञेयो रुद्रस्य ⏓⏓⏓ $M^Y$; ज्ञेयो रुद्रस्वरूपेण $G_2G_3$ **44 d.** °गतो ऽथवा ] $N_1M^Y$; °गताथवा $D^1$; °मथोपि वा $G_2G_3$; °मथो प्पि वा $M_2$; °गतोपि वा $E_D$

---

**41–44b.** Support for several of the Nepalese readings in this list can be found in the Javanese *Jñānasiddhānta* (11:15–17): श्रावना श्रावनी जग्रा तत्तृष्णा घ्राणवर्तिनी।
सुशब्दा वाहनी वोढ्री मननी धावनी शुभा॥ १५॥
आह्लादनी प्रदानाख्या वियोक्त्री रेतवाहिनी।
पितृमार्गानुगा नाडी देवमार्गप्रदर्शनी॥ १६॥
आकर्षनी कर्मणी वा प्राणदा प्रानवर्धनी।
चित्तसंस्था सुषंस्था च धूम्रा एव तथा ध्रुवा॥ १७॥

**43** ($b^1$–$b^3$) $G_3$

तदभ्यासादनन्तेशपदं यावद्गतिर्भवेत्।

[ललाटे]

उपरिष्टाद्यदा गच्छेल्ललाटस्थं तु चेश्वरम्॥ ४५॥
चतुर्नाडीसमोपेतं पद्मं तुर्यार्णगं मतम्।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्च नाडयः॥ ४६॥
ज्ञातव्यास्तु स्वरूपेण सूक्ष्माः शुद्धाश्च बिन्दुवत्।
सर्वकर्ता भवेद्योगी द्विरष्टार्धगुणान्वितः॥ ४७॥

[गुणाष्टकम्]

अणिमा लघिमा चैव महिमा प्राप्तिरिष्यते।
प्राकाम्यं च तथेशित्वं वशित्वं यत्रकामिता॥ ४८॥
सहसैव यदा देहं स्थूलं त्यक्त्वा यथेप्सया।

**45 a.** °नन्तेश° ] $D^1M^YG_2G_3M_2E_D$; °नन्तेशः $N_1$ **45 cd.** °द्यदा गच्छेल्ललाटस्थं तु चेश्वरम् ] $D^1$; °द्यदा गच्छेल्ललाटस्थन्तु चेश्वरः $N_1$; °द्यथा गच्छेल्ललाटस्थं सुरेश्वरं $M^Y$; °द्यथा वक्ष्ये ललाटस्थं सुरेश्वरम् $G_2G_3M_2E_D$ **46 a.** चतुर्नाडी° ] $N_1D^1M_2$; चतुर्णाडी° $M^YG_2G_3E_D$ **46 b.** तुर्यार्णगं ] $N_1D^1M^YG_2E_D$; तुर्यागमम् $G_3$; तुर्याणगं $M_2$ **46 c.** निवृत्तिश्च ] $N_1D^1G_2G_3M_2E_D$; विरक्तिश्च $M^Y$ **47 a.** ज्ञातव्यास्तु ] $G_3M_2E_D$; ज्ञातव्यस्व° $N_1M^Y$; ज्ञातव्यं स्व° $D^1$; ज्ञातव्या ⏑̲ $G_2$ **47 b.** सूक्ष्माः शुद्धाश्च बिन्दुवत् ] $E_D$; सूक्ष्मशुद्धोथ विन्दुवत् $N_1$; सूक्ष्मं शुद्धोथ विन्दुवत् $D^1$; सूक्ष्मशुद्धोथ बिंदुगः $M^Y$; सूक्ष्मशुद्धोथ बिन्दुमत् $G_2$; सूत्मशुद्धोथ बिन्दुमत् $G_3$; सूत्रशुद्धो थ बिन्दुमत् $M_2$ **47 c.** सर्वकर्ता ] $N_1D^1M^YE_D$; सर्वकर्त्तृ $G_2G_3M_2$ **47 d.** °र्धगुणान्वितः ] $N_1D^1G_2G_3^cE_D$; --- $M^Y$; °र्द्धगुणान्हितः $G_3^{ac}$; °द्विगुणाहितः $M_2$ **48 b.** प्राप्तिरिष्यते ] $G_2G_3M_2E_D$; प्राप्तिरिति श्रुतिः $N_1D^1$(unmetrical) **48 c.** प्राकाम्यं ] $N_1D^1M^YG_3E_D$; प्राकामाज् $G_2M_2$ **48 d.** वशित्वं यत्रकामिता ] $N_1M^YE_D$; वसित्वं यत्रकामता $D^1$; शिवत्वं यत्रकामिताः $G_2$; वशित्वञ्च त्रिकामिता $G_3$; वशित्वं यत्रकामिताः $M_2$ **49 a.** सहसैव यदा देहं ] $N_1D^1E_D$; स ह स व य दा द य $M^Y$ (tops missing); सहनैव यदा देहन् $G_2G_3$; सहनैव यदा देह° $M_2$ **49 b.** स्थूलं ] $N_1D^1$; स्था ल्य $M^Y$ (tops missing); मूलं $G_2G_3M_2E_D$ • यथेप्सया ] $N_1D^1$; ⊔ $M^Y$; यथेच्छयम् $G_2$; यथेच्छया $G_3M_2E_D$

**47** ($d^3$–$d^8$) $M^Y$
**48** ($a^1$–$c^1$) $M^Y$; ($a^3$–$a^4$) $G_2$

अणुमात्रशरीरत्वं याति तेनोच्यते ऽणिमा॥ ४९॥
पूर्वमासीद्गुरुत्वं यत्तत्त्यक्त्वा सहसैव तु।
तूलवल्लघुदेहस्थः स्वेच्छया लघिमा तदा॥ ५०॥
यत्रैव स्वेच्छया गच्छेत्तत्र तत्स्थानवासिभिः।
सर्वत्र पूज्यते यस्मान्महिमा तेन कीर्त्यते॥ ५१॥
अकस्मादभिलाषो वा यदा वस्तुगतो भवेत्।
निखिलद्रव्यसम्प्राप्तौ प्राप्तिर्नामात्र सर्वतः॥ ५२॥
आत्मनैव कृतं रूपं प्रपश्यामि यदात्मनि।
यथेच्छानुमतं कृत्यं प्राकाम्यं तदुदाहृतम्॥ ५३॥

---

**49 c.** अणुमात्रशरीरत्वं $D^1$; अनुमात्रशरीरत्वं $N_1$; अ णु मा त्र श री र स न् $M^Y$ (tops missing); अणुमाप्रशरीरस्थं $G_2M_2$; अणिमा प्रशरीरस्थं $G_3$; अणिमात्रं शरीरस्थं $E_D$ **49 d.** याति तेनोच्यते ऽणिमा ] $E_D$; यान्ति येन यदाणिमाम् $N_1D^{1ac}$; यान्ति येन यदाणिमा $D^{1c}$; या ति त ना च्य त णि मा $M^Y$ (tops missing); °स्यादि तोनोच्यते णिमा $G_2G_3M_2$ **50 a.** °सीद्गुरु° ] $D^1G_2G_3M_2E_D$; °सीगुरु° $N_1$; सा द्गु रु $M^Y$ (tops missing) **50 ab.** यत्तत्त्यक्त्वा ] $N_1M_2E_D$; यत्तत्त्यक्ता $D^1$; य त्त त्य क्त्वा $M^Y$ (tops missing); यत्यक्त्वा $G_2$(unmetrical); यत्तत्यक्त्वा $G_3$ **50 c.** तूलवल्लघुदेहस्थः ] $N_1$; कुलवल्लघुदेहस्थः $D^1$; तू ल व ल्ल घु द ⏑ स्थ $M^Y$ (tops missing); स्थूलवल्लघुदेहस्थं $G_2M_2E_D$; स्थूल्लघुदेहस्थम् $G_3$(unmetrical) **50 d.** स्वेच्छया लघिमा तदा ] $N_1D^1$; स्व च्छ या ल घि मा त था $M^Y$ (tops missing); सेच्छया लघिमा तदा $G_2G_3$; स्वेच्छया लवमामदं $M_2$; स्वेच्छया लघिमा मता $E_D$ **51 ab.** गच्छेत्तत्र तत्स्थान° ] $N_1D^1$; ग च्छ त्त त्र स्था ना $M^Y$ (tops missing); गच्छेतत्तस्थाननि° $G_2$; गच्छेत्तत्तत्स्थाननि° $G_3E_D$; गच्छेत्तत्तत्स्थानानि $M_2$ **51 d.** तेन कीर्त्यते ] $N_1D^1M^Y$; चेति कीर्त्त्यते $G_2G_3M_2$; चेति कीर्तिता $E_D$ **52 a.** अकस्मादभिलाषो ] $D^1M^YG_3M_2E_D$; अकस्मादभिलासो $N_1$; अकसादभिलाषो $G_2$ **52 b.** यदा वस्तु° ] $N_1D^1$; यद्वा वस्तु° $M^Y$; यद्वद्वस्तु° $G_2G_3M_2E_D$ **52 c.** निखिलद्रव्यसम्प्राप्तौ ] $D^1$; निखिलं द्रव्यसम्प्राप्तौ $N_1$; निखिलरव्यसंप्राप्तौ $M^Y$; निबलन्द्रव्यसम्प्राप्तो $G_2$; निश्चलद्रव्यसम्प्राक्तो $G_3$; निश्चलं द्रव्यसंपृक्तो $M_2$; निश्चलद्रव्यसंपृक्तो $E_D$ **52 d.** ;प्राप्तिर्नामात्र सर्वतः ] *conj.*; प्राप्तिणो मात्रसर्व्वतः $N_1$; प्राप्तिशोभा तु सर्वतः $D^1$; प्राप्तिनामात्र सर्वतः $M^Y$; प्राप्तिर्न्नामात्र संसदा $G_2$; प्राप्तिर्न्नामात्र संसदः $G_3$; प्राप्तिर्नामात्र संवदा $M_2$; प्राप्तिर्नामात्र सम्मता $E_D$ **53 b.** प्रपश्याअमि ] $N_1D^1$; प्रविश्यति $M^Y$; प्रप ⏑ ति $G_2$; प्रपश्यन्ति $G_3$; प्रपश्यति $M_2E_D$ **53 c.** यथेच्छानुमतं कृत्यं ] $N_1D^1$; यथेच्छानुमतः कृत्यं $M^Y$; यथेच्छं तु मनः कृत्वा $G_2G_3E_D$; यत्थेच्छं त्वदनः कृत्वा $M_2$

ब्रह्मविष्ण्विन्द्रसूर्यादिभवनं यदि याति सः।
तत्रेशित्वं प्रभुत्वं च ईशित्वमिह तन्मतम्॥ ५४॥
तत्रैव यद्वशित्वं स्याद्वशित्वं प्रणयाद्वरम्।
हठेन यद्वसित्वं स्याद्यत्रकामावसायिता॥ ५५॥
एते गुणाः प्रवर्तन्ते तस्येशाभ्यासतो ध्रुवम्।

[सदाशिवः / नादः]

बिन्दोरूर्ध्वं भवेन्नादः सूक्ष्मो दीर्घो ऽब्जतन्तुवत्॥ ५६॥
घण्टानाद इवाभ्यस्यः सदाशिवपदेप्सुभिः।
ऊर्ध्वमात्रान्तगो वाथ स्वरूपेण कलात्मकः॥ ५७॥
चतुर्नाडीसमोपेतः सो ऽपि पद्मान्तसंस्थितः।

---

**54 a.** ब्रह्मविष्ण्विन्द्र° ] $M^{Y}M_{2}E_{D}$; ब्रह्मा विष्ण्वेन्द्र° $N_{1}$; ब्रह्मविष्ण्वेन्द्र° $D^{1}$; बिह्मविष्ण्विन्द्र° $G_{2}$; ब्रह्मविष्णुवेद्र° $G_{3}$(unmetrical) **54 b.** यदि याति सः ] $N_{1}D^{1}$; यदि ⏓⏓ सः $M^{Y}$; मायया सह $G_{2}G_{3}M_{2}E_{D}$ **54 c.** तत्रेशित्वं ] $D^{1}M^{Y}E_{D}$; तत्रेशित्व° $N_{1}$; तत्रशित्वं $G_{2}G_{3}M_{2}$ **54 cd.** च ईशित्वमिह तन्मतम् ] $D^{1}M^{Y}$; च ईशित्वमिह तम्मतम् $N_{1}$; यदीशित्वमिह तन्मतम् $G_{2}G_{3}M_{2}$; यदीशित्वमिह तत्स्मृतम् $E_{D}$ **55 a.** तत्रैव ] $N_{1}D^{1}M^{Y}$; कत्रेवा $G_{2}$; कुत्रोवा $G_{3}$; अत्रे वा $M_{2}$; कृतो वा $E_{D}$ **55 b.** प्रणयाद्वरम् ] $G_{2}M_{2}E_{D}$; प्रणयात्वरम् $N_{1}$; प्रणयात्त्वरम् $D^{1}$; प्रणयात्परं $M^{Y}$; प्रणथद्वरम् $G_{3}$ **55** बश च। यद्वसित्वं ] $N_{1}D^{1}$; यद्वशित्वं $M^{Y}G_{2}G_{3}M_{2}E_{D}$ **55 d.** यत्रकामावसायिता ] $N_{1}D^{1}M^{Y}$; यत्र कामवशाधिगा $G_{2}$; यत्राकामव ⏓ धिगा $G_{3}$; सूत्रगामवशाधिका $M_{2}$; यस्य कामवशाधिगाः $E_{D}$ **56 a.** गुणाः ] $N_{1}D^{1}M^{Y}G_{2}G_{3}E_{D}$; गुणां $M_{2}$ **56 b.** तस्येशाभ्यासतो ] $M^{Y}G_{2}G_{3}M_{2}$; तस्यैषाभ्यासतो $N_{1}D^{1}$; तस्येशाभ्यां सतो $E_{D}$ **56 cd.** भवेन्नादः सूक्ष्मो दीर्घो ऽब्ज° ] $M^{Y}E_{D}$; भवेन्नादं सूक्ष्मदीर्घाब्ज° $N_{1}D^{1}$; भवेन्नादसूक्ष्मो दीर्घोब्ज° $G_{2}G_{3}M_{2}$ **57 a.** घण्टानाद इवाभ्यस्यः ] $M^{Y}$; घण्टानादैरिवाभ्यस्य $N_{1}D^{1}$; मेघनाद इवाभावत् $G_{2}$; मेघनाद इवाभावात् $G_{3}E_{D}$; मेघनाद इवाभात् $M_{2}$(unmetrical) **57 b.** °शिवपदेप्सुभिः ] $M^{Y}$; °शिवपदेप्सिभिः $N_{1}D^{1}$; °शिवभवेषुभिः $G_{2}G_{3}M_{2}E_{D}$ **57 c.** ऊर्ध्वमात्रान्तगो वाथ ] $N_{1}D^{1}$; ऊर्ध्वमात्रात्मको वाथ $M^{Y}$; ऊर्द्धनागान्तको नाथ $G_{2}G_{3}M_{2}$; ऊर्ध्वनागान्तकेनाथ $E_{D}$ **58 a.** चतुर्नाडी° ] $N_{1}D^{1}M_{2}$; चतुर्णाडी° $M^{Y}G_{2}G_{3}E_{D}$

इन्धिका दीपिका चैव रोधिका मोचिका तथा॥ ५८॥

[कुण्डलिनी]

तस्यापि परतः शक्तिर्ज्ञेया कुण्डलिनीति च।
शब्दान्ते ऽनुभवस्तस्याः सूक्ष्मरूपाथ रूपिणी॥ ५९॥

चतुर्नाडीसमोपेता सापि ज्ञेयाब्जमध्यगा।
सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृता मृता॥ ६०॥

सर्वज्ञः सर्वकर्ता च तदभ्यासाद्भवत्यसौ।

[परा शक्तिः]

तस्यापि परतः शक्तिश्चतुर्णाडीयुता परा॥ ६१॥

पद्ममध्ये स्थिता सापि सूक्ष्मात्यर्थनिरञ्जना।
व्यापिनी व्योमरूपा च अनन्तानाश्रिता परा॥ ६२॥

---

**58 c.** इन्धिका दीपिका ] $N_1M^YG_2G_3E_D$; इद्धिका दीपिका $D^1$; इन्धिका दीर्घिका $M_2$ **58 d.** रोधिका ] $N_1D^1M^Y$; रोचिका $G_2G_3E_D$; रेचिका $M_2$ • तथा ] $N_1D^1E_D$; °श्च ताः $G_2M^Y$; च ता $G_3$; °श्च ता $M_2$ **59 c.** °नुभवस्तस्याः ] $M^Y$; ह्यनुभवस्तस्या $N_1D^1$(unmetrical); तु भवेत्तस्याः $G_2G_3M_2E_D$ **59 d.** सूक्ष्मरूपाथ ] $N_1D^1$; सूक्ष्मरूपाति° $M^Y$; सूक्ष्मरूपानु° $G_2G_3M_2E_D$ **60 a.** चतुर्नाडी° ] $N_1D^1M^YM_2$; चतुर्णाडी° $G_2G_3E_D$ **60 b.** सापि ज्ञेयाब्जमध्यगा ] $N_1D^1$; सापि ज्ञेयाब्जमध्यमा $M^Y$; सा विज्ञेया ऽपि मध्यमा $G_2^cE_D$; (स्सोपि पत्मान्तसंस्थित---) सा विज्ञेयापि मद्धमा $G_2$; सा विज्ञेयापमद्धमा $G_3$; सा विज्ञेया प मध्यमाः $M_2$ **60 c.** सुसूक्ष्मा ] $N_1D^1M^YG_2E_D$; स्थसूक्ष्मा $G_3M_2$ **60 d.** चैवामृता ] $N_1D^1M^YG_2G_3E_D$; चाइवात्रता $M_2$ **61 a.** सर्वज्ञः ] $N_1D^1M^YE_D$; सर्वज्ञा $G_2G_3M_2$ **61 c.** चतुर्नाडी° ] $N_1D^1G_2G_3M_2$; चतुर्णाडी° $M^YE_D$ **62 a.** पद्ममध्ये स्थिता सापि ] $N_1G_2G_3M_2E_D$; पद्ममध्यस्थिता चापि $M^Y$ **62 b.** सूक्ष्मात्यर्थ° ] $N_1$; सूक्ष्मा अथ $D^1$; सूक्ष्मात्यर्थं $M^Y$; सूक्ष्माभ्यस्त° $G_2G_3M_2$; सूक्ष्माभ्यन्त° $E_D$ **62 cd.** च अनन्तानाश्रिता परा ] $N_1D^1$; च अनंतानाथाप्यनाश्रिता $M^Y$(unmetrical); न्तनाथानाशिता परा $G_2$(unmetrical); नान्तनाथनाशिवता परा $G_3$(unmetrical); °णां न नाथानाशितोवरम् $M_2$; चानन्तानाथाप्यनाश्रिता $E_D$

दुर्लक्ष्या सा तदभ्यासाद्व्यापकस्तत्क्षणाद्भवेत्।

[निष्कलम्]

तस्यापि परतः स्थानं निष्कलं नित्यमव्ययम्॥ ६३॥
ज्ञानरूपं च तच्छुद्धं व्यापकं निखिलाधिपम्।
एवं क्रमाद्गतो योगी तत्स्थानान्न निवर्तते॥ ६४॥

[नाडी शिवात्मिका]

नाभिमेढ्रान्तरे कन्दस्तत्र नाडी शिवात्मिका।
एकधावस्थिता हृत्स्था दशधा तत्र संस्थिता॥ ६५॥
तस्मात्स्थानाद्गता कण्ठं स्थिता तत्र द्विरष्टभिः।
तालुस्थानगता पश्चात्तत्रस्था षोडशाष्टभिः॥ ६६॥
पुनस्त्रिधा विभिन्ना सा नासावंशगता यदा।
पितृमार्गेण दैवेन रौद्रेण च विशेषतः॥ ६७॥

---

**63 a.** दुर्ल्लक्ष्य सा तदभ्यासाद् ] $N_1D^1M^Y$ ; दुर्लभ्या च तदभ्यासाद् $G_2G_3E_D$ ; दुर्लभ्या च सदाद्यद्वा $M_2$ **63 b.** °णाद्भवेत् ] $D^1M^YE_D$ ; °णा भवेत् $N_1G_2G_3$ ; °णं भवेत् $M_2$ **64 a.** तच्छुद्धं ] $N_1M^Y$ ; तच्छुद्धं $D^1$ ; बोद्धव्य ⊔ $G_2$ ; बोद्धव्यं $G_3M_2E_D$ **64 b.** व्यापकं निखिलाधिपम् ] $D^1$ ; व्यापकन्तंन्निखिलाधिपम् $N_1$(unmetrical) ; व्यापकं निखिलाधिकं $M^Y$ ; ⊔ निबलानिवत् $G_2$ ; निश्चला ⊔ निवत् $G_3$ ; निश्चलं ⊔ रिवत् $M_2$ ; निश्चलानिलसन्निभम् $E_D$ **64 c.** क्रमाद्गतो ] $M^YG_2G_3M_2E_D$ ; क्रमागतो $N_1D^1$ **65 a.** नाभिमेढ्रांतरे कन्दस् ] $M^Y$ ; नाभिमेद्रान्तरे कन्दः $N_1$ ; नाभिमेढ्रोत्तरे कन्दे $D^1$ ; नाभिमेढ्रात्ततो क्रुद्धात् $G_2G_3$ ; नाभिमेढ्रात्ततो क्रुद्धा $M_2$ ; नाभिमेढ्रात्ततः क्रुद्धात् $E_D$ **65 c.** एकधावस्थिता हृत्स्था ] $D^1M^YG_2E_D$ ; एकधावस्थिता हृस्था $N_1G_3$ ; एकयावस्थिता ह्रस्था $M_2$ **66 a.** स्थानाद्गता कण्ठं ] $D^1$ ; स्थानाद्गतो कण्ठं $N_1$ ; स्थानाद्गता गर्णे $M^Y$ ; स्थानात्स्थिता कण्ठे $G_2$स्थानात्स्थिता कर्णे $G_3M_2E_D$ **66 c.** तालुस्थानगता पश्चात् ] $E_D$ ; नाडीभिस्तालुगस्यैव $N_1D^1$ ; स्थालुस्थानगता पश्चात् $M^Y$ ; तालुस्थानगताः(तः $G_3M_2$) पश्चात् $G_2G_3M_2$ **66 cd.** तत्रस्था षोडशाष्टभिः ] $M^Y$ ; संस्थिता षोडशाष्टभिः $N_1D^1$ ; तत्रस्था षोडशात्मभिः $G_2G_3M_2E_D$ **67 a.** पुनस्त्रिधा ] $N_1D^1M^YG_2G_3E_D$ ; पुनस्त्रया $M_2$ **67 b.** नासावंश° ] $N_1D^1E_D$ ; नाशावंश° $M^Y$ ; वंश° $G_2$(eyeskip) ; सानाडावंश° $G_3$(unmetrical) ; नाड्या विंश $M_2$ **67 c.** दैवेन ] $N_1$ ; देवेन $D^1M^YG_2G_3M_2E_D$ **67 d.** रौद्रेण च ] $N_1D^1M^YG_3M_2E_D$ ; रौद्रेण $G_2$(unmetrical)

सुषुम्ना नाम या नाडी मध्यमार्गव्यवस्थिता।
पिङ्गलेडा क्रमाज्ज्ञेया वामदक्षिणगा खग॥ ६८॥
बिम्बवर्णगुणाधारं शक्तिदैवतसंयुतम्।
नाडीत्रयमिदं ज्ञेयं त्रिकव्याप्तं यथार्थतः॥ ६९॥
त्रिष्कालविषयज्ञानमेतदभ्यासतो भवेत्।
वामेनातीतविषयं दक्षिणे ऽनागतं भवेत्॥ ७०॥
वर्तमानं तु मध्येन मार्गेण क्रमयोगतः।
निष्ठान्वितस्य षण्मासाज्ज्ञानमुत्पद्यते ध्रुवम्॥ ७१॥
गतागतौ पटोस्तस्य योगिनो नात्र संशयः।

[खन्देहः शम्भुः]

अथवा भावयेच्छम्भुं खन्देहन्तु कलात्मकम्॥ ७२॥

---

**68 a.** सुषुम्ना ] $D^1M^YG_2G_3M_2E_D$; सुशुम्ना $N_1$ **68 b.** °मार्ग° ] $N_1D^1M^YG_3M_2E_D$; °मार्गा $G_2$ **68 c.** पिङ्गलेडा क्रमाज्ज्ञेया ] *conj.*; पिङ्गलेडा क्रमा ज्ञेया $N_1$; पिंगळेडे क्रमात् ज्ञेये $M^YD^{1c}$; पिंगलेडो क्रमाज्ज्ञेये $D^{1ac}$; पिङ्गळा या क्रमाज्ज्ञेया $G_2G_3M_2E_D$ **68 d.** वामदक्षिणगा ] $N_1$; वामदक्षिणगे $D^1$; वामदक्षिणके $M^Y$; दक्षिणे वामगे $G_2G_3$; दक्षिणे वामके $M_2E_D$ **69 a.** बिम्बवर्णगुणाधारं ] *conj.*; विम्ववर्ण्णगुणाधारः $N_1$; विम्ववर्णगुणाधार $D^1$; बिंदुवर्णगुणाधारा $M^Y$; बिम्बवंशगुणाधारं $G_2G_3$; बिम्बवंग-गुणाधारं $M_2$; बिम्बवच्च गुणाधारं $E_D$ **69 b.** °दैव° ] $D^1M^YE_D$; °देव° $N_1G_2G_3M_2$ **69 d.** त्रिकव्याप्तं यथा° ] $E_D$; तृकव्यास्या यथा° $N_1D^1$; त्रिकव्याप्या यथा° $M^Y$; त्रिकव्याप्ता यदा° $G_2$; त्रिकव्याप्ता यथा° $G_3$; त्रिगव्याप्ता यथा° $M_2$ **70 a.** त्रिस्का-लविषय° ] $N_1$; त्रिकालविषयं $D^1M^Y$; त्रिकालविषम° $G_2G_3M_2$; त्रिकालविषय° $E_D$ **70 b.** °तदभ्यासतो ] $D^1M^YG_2G_3M_2E_D$; °तदाभ्यासतो $N_1$ **70 c.** वामेनातीतविष-यं ] $G_2G_3E_D$; वामेनाडीतविषयं $N_1$; वामेनाडीतद्विषयं $D^1$; वामेनानीतविषयं $M^Y$; वामेनातीतविषय° $M_2$ **71 c.** निष्ठान्वितस्य षण्मासाज् ] $D^1$; निष्ठान्वितस्य षङ्मासा $N_1M^Y$; निष्ठाद्यदस्य षण्मासा $G_2$; निष्ठाद्यदस्य षण्मासात् $G_3$; निष्ठाद्यदस्य षाण्मासा $M_2$; निष्ठाद्यं तस्य षण्मासाज् $E_D$ **71 d.** ज्ञानमुत्पद्यते ] $N_1D^1M^YE_D$; ज्ञानमुत्पाद्यते $G_2G_3$; द्यनमुत्पाद्य तं $M_2$ **72a.** °गतौ पटोस्तस्य ] $E_D$; °गतौ लयस्थः स्याद् $N_1D^1$; °गतौ जयस्तस्य $M^Y$; °गतो लटास्तस्य $G_2G_3$; °गतो लडक्तस्य $M_2$ **72 c.** °येच्छ-म्भुं ] $M^YG_2G_3M_2E_D$; °येच्छम्भुः $N_1$; °येच्छस्तं $D^1$ **72 cd.** खन्देहन्तु कलात्मकम् ] $N_1$; खण्डहेतुकलात्मकम् $D^1$; खे देहासुकलात्मकं $M^Y$; स्वदेहाणुतरात्मकम् $G_2G_3E_D$; स्वदेहानुतरात्मकम् $M_2$

खमाकाशं परं शान्तं नासाग्राद्द्विदशाङ्गुलम् ।
संस्थितं चारमार्गेण व्याप्त्या भाव्यं यथार्थतः ॥ ७३ ॥

शिरःपाण्यादिसंयुक्तः शुद्धदेहः स हृद्गतः ।
अणुमात्रः शिवः सूक्ष्मः शब्दब्रह्म तदेव तु ॥ ७४ ॥

कलापि हृद्गता शक्तिर्दीपवर्तिरिवोज्ज्वला ।
यदिच्छानिहितं ध्यानं प्राप्तिरुक्ता तदात्मिका ॥ ७५ ॥

योगी ब्रह्मादिकं कालं
यावदास्ते यथेप्सया ।
याति वा स्वेच्छया योगी
कृत्वोत्क्रान्तिं यथोदिताम् ॥ ७६ ॥

---

**73 a.** खमाकाशं ] $N_1D^1$ ; समाकाशं $M^Y$ ; स्वमताच्च $G_2E_D$ ; स्वमाता च $G_3$ ; स्वमता च $M_2$ **73 b.** नासाग्राद्द्विदशाङ्गुलम् ] *conj.*; नासाग्राद्द्विदशाङ्गुलम् $N_1D^1$ ; नासाग्राद्वादशांगुले $M^Y$ ; नासाग्रद्वादशांगुले $G_2M_2$ ; नासाग्रन्द्वादशांगुले $G_3$ ; नासाग्राद्वादशाङ्गुले $E_D$ **73 c.** चार° ] $N_1D^1$ ; चारु° $M^Y$ ; शार° $G_2G_3E_D$ ; शर° $M_2$ **73 d.** व्याप्त्या भाव्यं यथा° ] $M^Y$ ; व्यात्प्या भाव्य यथा° $N_1$ ; व्याप्यो नाप्य यथा° $D^1$ ; व्याप्ता भाव्यं यदा° $G_2G_3$ ; व्याप्ता भाव्यं यथा° $M_2E_D$ **74 ab.** °युक्तः शुद्धदेहः स हृद्गतः ] *conj.*; °युक्तं शुद्धदेहः स हृद्गतः $N_1D^1$ ; °युक्तः शुद्धदेहस्तु हृद्गतः $M^Y$ ; °युक्तामूर्द्धस्वहृत्गतम् $G_2$(unmetrical); °युक्तामूर्द्धदेवस्वहृत्गतम् $G_3$ ; °युक्तादूर्ध्वदेवसहृद्गतम् $M_2$ ; °युक्तमूर्ध्वदेवं स्वहृद्गतम् $E_D$ **74 c.** अणुमात्रः ] $D^1M^YE_D$ ; अनुमात्र° $N_1$ ; अणुमादि° $G_2M_2$ ; अणिमादि° $G_3$ • सूक्ष्मः ] $N_1D^1M^YG_2E_D$ ; सूक्ष्म $G_3M_2^c$ ; सूक्ष्मा $M_2^{ac}$ **74 d.** तदेव तु ] $N_1D^1M^Y$ ; भवेदिति $G_2G_3M_2E_D$ **75 ab.** शक्तिर्दीपवर्तिरिवोज्ज्वला ] $N_1D^1M^YG_2M_2$ ; ददीपत्निरिवोज्वला $G_3$(unmetrical); तद्वद्दीपशक्तिरिवोज्ज्वला $E_D$ **75 cd.** यदिच्छानिहितं ध्यानं प्राप्तिरुक्ता तदात्मिका ] $N_1D^1$ ; यथेच्छाभिमताध्यानात् प्राप्तिरुक्ता तदात्मिका $M^Y$ ; यदीशा(यदिशा $G_2M_2$)भिमतध्यानात्प्रागुक्ता भक्तिका भवेत् $G_2M_2E_D$ ; यदीशाभिमतद्ध्यानात् प्रागुक्तभिक्तिका भवेत् $G_3$ **76 a.** योगी ब्रह्मादिकं कालं ] $N_1D^1M^Y$ ; योनौ मयादिकं कालं $G_2$ ; योनो मयादिकं कालं $G_3$ ; योनो मयाधिकं कालं $M_2$ ; योनौ मायादिकं कालं $E_D$ **76 b.** यावदास्ते यथेप्सया ] $N_1D^1$ ; यावदास्ते यथेच्छया $M^YG_3M_2E_D$ ; यावदास्थे यथेच्छया $G_2$ **76 d.** कृत्वोत्क्रान्तिं यथोदिताम् ] $M^YG_2$ ; कृत्वोत्क्रान्तियथोदिता $N_1$ ; कृत्वोत्क्रान्तिं यथोदितम् $D^1$ ; कृत्वोत्क्रान्तिर्यथोदिता $G_3E_D$ ; कृत्वोत्क्रादि ⊔ थोदिता $M_2$

एवं योगः समाख्यातः ब्रह्मकालादिदीपकः।
विज्ञेयो ऽभ्यसनीयश्च कांक्षेद्योगीश्वरं पदम्॥ ७७॥

इति किरणाख्ये तन्त्रे ऽष्टपञ्चाशत्तमः पटलः॥

---

**77 a.** योगः समाख्यातः ] $N_1D^1M^YG_3E_D$; योग समाख्यातः $G_2$; योगस्समाख्याता $M_2$ **77 b.** ब्रह्मकालादिदीपकः ] *conj.*; ब्रह्मा कालादिदीपकः $N_1$; check $D^1$; सर्वयोगेष्वनुत्तमः $M^YG_2G_3M_2E_D$ **77 c.** °भ्यसनीयश्च ] $N_1D^1M^YE_D$; °भ्यासनीयश्च $G_2G_3M_2$ **77 d.** कांक्षेद्योगीश्वरं पदम् ] $E_D$; काक्षं योगेश्वरं पदम् $N_1$; कांक्षां योगेश्वरं पदम् $D^{1c}$; कांक्षं योगेश्वरं पदम् $D^{1ac}$; कांक्षेद्योगेश्वरं पदम् $M^Y$; कांक्षेद्योगीश्वरम् मतः $G_2G_3$; कांषेद्योगीश्वरो मतम् $M_2$ • Colophon: इति किरणाख्ये महातन्त्रे ष्टपञ्चाशत् पटलः श्लोका ७३ ⊗ $N_1$; इति × श्री× किरणाख्ये महातंत्रे अष्टपंचाशत्पटलम् $D^1$; इति श्रीकिरणाख्ये महातंत्रे एकोनषष्टिपटलः॥ $M^Y$; इति श्रीमत्किरणाख्ये महातन्त्रे योगपादे अष्टपञ्चाशत्पटलः। $G_2G_3M_2$; इति किरणाख्ये महातन्त्रे योगपादे योगाभ्यासविधिः प्रथमः पटलः॥ $E_D$